International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 127-131
© 2019 IJSR
www.anantaajournal.com
Received: 07-05-2019
Accepted: 09-06-2019

**डॉ. मुकेश कुमार टेलर**
शिक्षक, केंद्रीय विद्यालय झुंझुनू झुंझुनू, राजस्थान, भारत

Correspondence
**डॉ. मुकेश कुमार टेलर**
शिक्षक, केंद्रीय विद्यालय झुंझुनू झुंझुनू, राजस्थान, भारत

# पौराणिकी सृष्टिः हिरण्याण्डोत्पत्तिश्च

## डॉ. मुकेश कुमार टेलर

### प्रस्तावना

आधुनिकविज्ञाने सृष्टिप्रक्रियाया: अध्ययनस्यैका पृथगेव शाखा प्रचलिता या सृष्टिविज्ञानम् (Cosmology) इति नाम्ना प्रसिद्धास्ति । महापुराणेषु सृष्टिप्रक्रियाया: अध्ययनसन्दर्भे पौराणिकसर्ग एवात्र पौराणिकसृष्टिविज्ञानमिति नाम्नाभिहितमस्ति। सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरिताख्येषु पञ्चसु पुराणविषयेषु सर्ग एव सर्वप्रथम: सर्वप्रमुखश्च वर्ण्यविषयोऽस्ति । यद्यपि पौराणिकसृष्टिप्रक्रियायां साङ्ख्यदर्शनस्य विशिष्टप्रभाव: परिलक्ष्यते तथापि पौराणिकसृष्टिविद्याया: स्वतन्त्ररूपेण विशिष्टमहत्त्वं विद्यते । श्रीसुरजनदासस्वामिमहाभागानां मतानुसारेण पुराणस्य पञ्चवर्ण्यविषयेषु प्रत्येकस्मिन् पञ्चान्तर्विषया अपि सन्निविष्टा: सन्ति । तन्मतानुसारं पौराणिकसृष्टिविज्ञाने ये पञ्चविभागा: कृता:, ते सन्ति- 1. सृष्टिक्रम:, 2. सृष्टिकारणविषयकविभिन्नमतानि, 3. अवतार:, 4. आयति: 5. ब्रह्माण्डश्चेति । [1] पुराणेषु सृष्ट्या: मूलकारणं ब्रह्म एवोक्तम् । ब्रह्मैव पुराणेषु 'नारायण:' 'विष्णु:' वेति नामभ्यां प्रथितमस्ति । सम्पूर्णं व्यक्ताव्यक्तपुरुषकालादिरूपं जगदिदं क्रीडतो बालकस्येव भगवत: विष्णो: चेष्टास्वरूपमेवोक्तम् । यथोक्तं विष्णुपुराणे-

व्यक्तं विष्णुस्तथाव्यक्तं पुरुष: काल एव च ।
क्रीडतो बालकस्येव चेष्टां तस्य निशामय ।। [2]

समानैवोक्ति: गरुडपुराणेऽप्युपलभ्यते । [3]

पुराणानामनुसारं सृष्टेरुद्भवात्पूर्वं दिवसरात्र्याकाशपृथिव्यन्धकारप्रकाशादीनामप्य-स्तित्वं नासीत् । नैव कस्यचिदन्यतत्त्वस्यैवाविर्भाव: सञ्जात: ।

तदा केवलं बुद्धीन्द्रियादिकैरनुपलभ्यं ब्रह्म एवासीत् ।

नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभूच्च नान्यत् ।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ।। [4]

अग्निपुराणकारेणाप्यस्य समर्थनमभवत् -

ब्रह्माव्यक्तं सदाग्रेऽभून्न खं रात्रिर्दिनादिकम्।[5]

तदा विष्णोः तदुपाधिरहितस्वरूपात् प्रधानपुरुषयोराविर्भावः सञ्जातः ।

विष्णोः स्वरूपात्परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र । [6]

देवीभागवतेनापीयमुक्तिः प्रमाणिता-

एकमेवाद्वितीयं वै ब्रह्म नित्यं सनातनम् ।
द्वैतभावं पुनर्याति काले उत्पित्सुसञ्ज्ञके।।[7]

तदनन्तरं श्रीभगवान् विष्णुः पुरुषरूपेण प्रकृत्यां प्रविश्य तां क्षोभयामास । ततः प्रकृतेः महत्ततत्त्वस्योत्पत्तिरभूत् । महत्ततत्त्वात् वैकारिकः तैजसः तामसश्च त्रिविधोऽहङ्कारः उत्पन्नः । सन्दर्भेऽस्मिन्नत्र केषाञ्चन पुराणानामुक्तयः द्रष्टव्याः - विष्णुपुराणे-

ततस्तु तत्परं ब्रह्म परमात्मा जगन्मयः ।
सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ।।
प्रधानपुरुषौ चापि प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ।।[8]
प्रधानतत्त्वमुद्भूतं महान्तं तत्समावृणोत् ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्।।
प्रधानतत्त्वेन समं त्वचा बीजमिवावृत्तम् ।
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।।
त्रिविधोऽयमहङ्कारो महत्ततत्वादजायत । [9]

भागवतपुराणे-

कालाद्गुणव्यतिकरः परिणामः स्वभावतः ।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ।।
सोऽहङ्कार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।।[10]

वायुपुराणे-

तस्यात्मना सर्वमिदं व्याप्तमासीत्तमोमयम्।
गुणसाम्ये तदा तस्मिन् गुणभावे तमोमये ।।
सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै ।
गुणभावाद्वाच्यमानो महान् प्रादुर्बभूव ह।।[11]

अग्निपुराणे-

सर्गकाले महत्ततत्त्वमहङ्कारस्ततोऽभवत् ।
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।।[12]

अहङ्कारस्य तामसरूपाच्छब्दस्पर्शरूपरसगन्धेतिपञ्चतन्मात्राण्याकाशवायुतेज- जलपृथिवीतिपञ्चमहाभूतानि च समुत्पन्नानि, तस्यैव तैजसरूपात् (राजसरूपात्) श्रोत्रस्पर्शनेत्रजिह्वाघ्राणेतिपञ्चज्ञानेन्द्रियाणि वाग्घस्तोपस्थपायुपादेतिपञ्चकर्मेन्द्रियाणि

ज्ञानशक्तिरूपा बुद्धिः क्रियाशक्तिरूपप्राणाश्चोत्पन्नाः पुनश्चाहङ्कारस्यैव सात्विकरूपात् (वैकारिकरूपात्) इन्द्रियाणामधिष्ठातृदेवतानां मनसश्चोत्पत्तिरभवत्। [13]

समानमेव वर्णनं पद्मपुराणेऽपि प्राप्यते-

गुणव्यञ्जनसम्भूत: सर्गकाले नराधिप ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्॥
प्रधानतत्त्वेन समं तथा बीजादिभिर्वृत: ।
वैकारिकस्तैजसश्चभूतादिश्चैव तामस: ॥
त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत ।
भूतेन्द्रियाणां पञ्चानां तथा कर्मेन्द्रियै: सह॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
एकैकश: स्वरूपेण कथयामि यथोत्तरम् ॥
शब्दमात्रमथाकाशं भूतादि: खं समावृणोत् ।
अथाकाशं विकुर्वाणं स्पर्शमात्रं ससर्ज ह ॥
बलवानेष वै वायुस्तस्य स्पर्शो गुणो मत: ।
आकाशं शब्दमात्रं तु स्पर्शमात्रं समावृणोत् ॥
ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ।
ज्योती रूपन्तु तद्वायुस्तद्रूपगुणमुच्यते ॥
स्पर्शरूपस्तु वै वायू रूपमात्रं समावृणोत् ।
ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ॥
सम्भवन्ति ततोऽम्भांसि रूपमात्रं समावृणोत्।
विकुर्वाणानि चाम्भांसि गन्धमात्रंससर्जिरे ॥
सङ्घातो जायते तस्मात्तस्य गन्धो मतो गुण: ।
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ॥
एकादशम्मनश्चात्र देवा वैकारिका: स्मृता: ।
त्वक्चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पञ्चमम्॥
एतेषां तु मतं कृत्यं शब्दादिग्रहणं पुन: ।
वाक्पाणिपादपायूनि चोपस्थं तत्र पञ्चमम्॥[14]

इदमेव सृष्टिवर्णनं प्राय: समानोक्तिषु (किञ्चिद्वाक्यभेदात्) अग्निपुराणे [15], वायुपुराणे [16], वराहपुराणे [17], ब्रह्मवैवर्तपुराणे [18], श्रीमद्भागवतपुराणे [19], लिङ्गपुराणे [20], भविष्यपुराणे [21], मत्स्यपुराणे [22], ब्रह्मपुराणे [23], कूर्मपुराणे [24], मार्कण्डेयपुराणे [25], नारदपुराणे [26] चाप्युपलभ्यते ।
अहङ्कारोत्पन्नानि भूतान्येतानि संहतिं विना सृष्टे: सृजने समर्था: नासन् । अत: प्रधानतत्त्वस्यानुग्रहेण तानि सर्वाणि मिलित्वेकमण्डमुत्पादितवन्त: । गोलाकारं सलिलाधारं सुवर्णाभायुक्तमण्डमिदं 'हिरण्यगर्भ:' इति नाम्नाभिज्ञायते । सन्दर्भेऽस्मिन् विष्णुपुराणस्योक्ति: द्रष्टव्या-

पुरुषाधिष्ठितत्वाच्च प्रधानानुग्रहेण च ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते॥
तत्क्रमेण विवृद्धं सज्जलबुद्बुद्वत्समम् ।
भूतेभ्योऽण्डं महाबुद्धे महत्तदुदकेशयम् ॥ [27]

श्रीमद्भावगतेऽपि-

यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणा: ।
यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥
तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिता: ।
सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यद: ॥
वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ।
कालकर्मस्वभावस्थो
जीवोऽजीवमजीवयत्॥[28]

कूर्मपुराणेऽपि हिरण्याण्डस्य प्रमाणमुपलभ्यते-

एते सप्त महात्मानो ह्यन्योऽन्यस्य समाश्रयात् ।
नाशक्नुवन्प्रजा: स्रष्टुमसमागम्य कृत्स्नश:॥
पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ।
महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते॥
एककालसमुत्पन्नं जलबुद्बुद्वच्च तत् ।
विशेषेभ्योऽण्डमभवद्बृहदुदकेशयम् ॥ [29]

पद्मपुराणेऽपि द्रष्टव्यम्-

नानावीर्या: पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन्प्रजा: स्रष्टुमसमागम्य कृत्स्नश:॥

समेत्यान्योन्यसंयोगात्परस्परसमाश्रयात् ।
एकसङ्घातलक्षाश्च सम्प्राप्यैक्यमशेषत: ।।
पुरुषाधिष्ठिततत्वाच्च व्यक्तानुग्रहणे तथा ।
महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते।।[30]

एवमेव ब्रह्मपुराणे [31], अग्निपुराणे [32], भविष्यपुराणे [33], गरुडपुराणे [34], लिङ्गपुराणे [35], मत्स्यपुराणे [36], मार्कण्डेयपुराणे [37], वायुपुराणे [38] चापि हिरण्यगर्भविषये वर्णनमुपलभ्यते ।
आदौ जगदाधारमिदमण्डं जलबुदबुदमिवासीत् । शनै: शनैरिदं वृद्धिं प्राप्तं विशालकायञ्चाभवत् । आप: (नारा) एवास्यायनमासन्नत: 'नारायण:' इति नाम्ना प्रसिद्धम् । [39] हिरण्यगर्भादण्डादेतस्मादेव प्रथमपुरुषस्य प्रादुर्भाव: जात:, स पुरुष: जगति 'ब्रह्म' इति नाम्ना ख्यातिं प्राप्त: । अयमेव प्रथमश्शरीरी मत: । अस्मिन् विषये वायुपुराणे [40] कूर्मपुराणे [41] च प्राय: समानशब्दात्मकं वर्णनमिदं प्राप्यते-

प्राकृतेऽण्डे विवृद्धे सन् क्षेत्रज्ञो ब्रह्मसंज्ञित: ।
स वै शरीरी प्रथम: स वे पुरुष उच्यते ।।
आदिकर्त्ता च भूतानां ब्रह्माऽग्रे समवर्त्तत ।
हिरण्यगर्भ: सोऽग्रेऽस्मिन् प्रादुर्भूतश्चतुर्मुख:।।

हिरण्यगर्भेण ब्रह्मणैव सम्पूर्णमिदं चराचरं जगद्व्याप्तमस्ति । सृष्टे: सृजनप्रक्रिया ब्रह्मण एव समारब्धा । सुवर्णमयादण्डादेतस्मादैव ब्रह्मणोत्पत्ति: ब्रह्मणश्च समस्तनक्षत्रमण्डलस्य चराचरजगत: सदेवासुरमानुषसमस्तप्राणिनाञ्चोत्पत्तिरभूत्। [42] तद्धिरण्याण्डस्य विशालकाये सति तद्गर्भितनदीपर्वतमेरुसमुद्रादीनाममुत्पत्तिरभवत्। समस्तलोका:, सप्तद्वीपा:, समस्तनदीपर्वतसमुद्रादिभिस्सह पृथिवी, सग्रहौ सनक्षत्रौ च चन्द्रादित्यौ, देवासुरा:, मानवा:, पशुपक्षिण: समस्तप्रजाश्चेत्येतानि सर्वाणि यानि तदण्डगर्भगतान्यासन् [43] तानि सर्वाणि ब्रह्मणा सह तत: समुद्भूतानि । एतस्मिन् विषये श्रीविष्णुपुराणस्य कथनमिदमुल्लेखनीयमस्ति-

मेरुरुल्बमभूतस्य जरायुश्च महीधरा: ।
गर्भोदकं समुद्राश्च तस्यासन्सुमहात्मन: ।।
साद्रिद्वीपसमुद्राश्च सज्योतिर्लोकसङ्ग्रह: ।
तस्मिन्नण्डेऽभवद्विप्र सदेवासुरमानुष: ।।
वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहि: ।
वृतं दशगुणैरण्डं भूतादिर्महता तथा ।। [44]

अग्निपुराणे कथनं प्राप्यते यद्ब्रह्मणा तदण्डस्य द्वैधं कृतं तेन द्युलोकस्य भूलोकस्य च निर्माणं जातम्, तयोर्मध्ये चाकाशस्यापि सृष्टि: कृता । अग्निपुराणस्य वचनमिदं द्रष्टव्यम्-

तदण्डमकरोद्द्वैधन्दिवं भुवमथापि च ।
तयो: शकलयोर्म्मध्ये आकाशमसृजत्प्रभु:।।[45]

स एव हिरण्यगर्भ: ब्रह्मा सुरज्येष्ठ-चतुर्वक्तृ-परमेष्ठी-पितामह-क्षेत्रज्ञ-पुरुष-शम्भु-नारायणेति नामभि: प्रकीर्त्यते । [46] स एव कनकाण्डज: भगवान् ब्रह्मा रजोगुणं धारयित्वा सृष्टिकार्ये प्रवृत्त: भवति, सात्विकं विष्णुरूपं धारयित्वा सृष्टे: पालनं करोति तमोगुणञ्च समाश्रित्य रुद्ररूपेण सम्पूर्णजगत: संहारं करोति । कूर्मपुराणस्योक्तिरियं द्रष्टव्या-

रजोगुणमयं चान्यद्रूपं तस्यैव धीमत: ।
चतुर्मुखस्तु भगवान् जगत्सृष्टौ प्रवर्तते ।।
सृष्टं च पाति सकलं विश्वात्मा विश्वतो मुख: ।
सत्त्वं गुणमुपाश्रित्य विष्णुर्विश्वेश्वर: स्वयम्।।
अन्तकाले स्वयं देव: सर्वात्मा परमेश्वर: ।
तमोगुणं समाश्रित्य रुद्र: संहरते जगत् ।।[47]

समानमेव वाक्यं लिङ्गपुराणेऽपि प्राप्यते -
सर्गे च रजसा युक्त: सत्त्वस्थ: प्रतिपालने ।
प्रतिसर्गे तमोद्रिक्त: स एव त्रिविध: क्रमात्।।
आदिकर्ता च भूतानां संहर्ता परिपालक: ।
तस्मान्महेश्वरो देवो ब्रह्मणोऽधिपति: शिव:।।
सदाशिवो भवो विष्णुर्ब्रह्मा सर्वात्मको यत: ।
एकदण्डे तथा लोका इमे कर्ता पितामह:।।[48]

यत्रकुत्रापि हिरण्याण्डादुद्भूतस्य ब्रह्मण: चर्चा विराटपुरुषरूपेऽपि कृता । तस्मिन्नेव विराटपुरुषे समस्तलोकचराचरजगच्चातुर्वर्ण्यादय: परिकल्पिता: । श्रीमद्भागवतपुराणे एतादृशी चर्चा प्राप्यते । एवं सृष्टिक्रमेण सह हिरण्याण्डस्योत्पत्तेरपि वर्णनमपि प्रायः सर्वेषु एव पुराणेषूपलभ्यते

**संदर्भ**


1. श्रीसुरजनदासस्वामीविरचिते 'पुराणरहस्य' इति पुस्तके, पृ०सं०-51
2. श्रीविष्णुपुराणे 1/2/18
3. गरुडपुराणे 1/4/5
4. श्रीविष्णुपुराणे 1/2/23
5. अग्निपुराणे 17/2
6. श्रीविष्णुपुराणे 1/2/24
7. देवीभागवते 3/6/4
8. श्रीविष्णुपुराणे 1/2/28-29
9. श्रीविष्णुपुराणे 1/2/34-36
10. श्रीमद्भागवतपुराणे 2/5/22, 24
11. वायुपुराणे 4/21-22
12. अग्निपुराणे 17/3
13. श्रीविष्णुपुराणे 1/2/36-50
14. पद्मपुराणे सृष्टिखण्डे 2/90-101
15. अग्निपुराणे 17/3
16. वायुपुराणे 4/48-59
17. वराहपुराणे 2/7-10
18. ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे 3/4-5
19. श्रीमद्भागवतपुराणे 2/5/25-31
20. लिङ्गपुराणे पूर्वभागे 3/15-32
21. भविष्यपुराणे 1/2/24-27
22. मत्स्यपुराणे 3/17-20
23. ब्रह्मपुराणे 1/35
24. कूर्मपुराणे पूर्वभागे 4/18-32
25. मार्कण्डेयपुराणे 45/38-56
26. नारदपुराणे पूर्वभागे 3/32-33
27. श्रीविष्णुपुराणे 1/2/53-54
28.[1] श्रीमद्भागवतपुराणे 2/5/32-34
29. कूर्मपुराणे पूर्वभागे 4/34-36
30. पद्मपुराणे सृष्टिखण्डे 2/104-106
31. ब्रह्मपुराणे 1/38
32. अग्निपुराणे 17/8
33. भविष्यपुराणे 1/2/15
34. गरुडपुराणे 1/4/8
35. लिङ्गपुराणे पूर्वभागे 3/28
36. मत्स्यपुराणे 2/29-30
37. मार्कण्डेयपुराणे 45/62
38. वायुपुराणे 4/65-67
39. ब्रह्मपुराणे 1/38, अग्निपुराणे 17/8, भविष्यपुराणे 1/2/19, कूर्मपुराणे पूर्वभागे 4/34-36, ब्रह्माण्डपुराणे 1/5/5, मार्कण्डेयपुराणे 47/5, वायुपुराणे 6/5
40. वायुपुराणे 4/68-69
41. वायुपुराणे 4/68-69, मार्कण्डेयपुराणे 45/63-64, कूर्मपुराणे पूर्वभागे 4/37-38
42. मार्कण्डेयपुराणे 45/65-67, पद्मपुराणे सृष्टिखण्डे 2/110-113, ब्रह्मपुराणे 1/40, अग्निपुराणे 17/8, भविष्यपुराणे 1/2/22-28, गरुडपुराणे 1/4/8-9, वायुपुराणे 4/72-74, श्रीविष्णुपुराणे प्रथमांशे 2/58-60, श्रीमद्भागवतपुराणे 2/5/35-42, कूर्मपुराणे पूर्वभागे 4/41
43. वायुपुराणे 4/71-74
44. श्रीविष्णुपुराणे 1/2/57-59
45. अग्निपुराणे 17/10
46. भविष्यपुराणे 1/2/16-17
47. कूर्मपुराणे पूर्वभागे 4/50-52
48. लिङ्गपुराणे पूर्वभागे 3/36-38